संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - १२
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

काश्मीरिकमहाकवि-भूमभट्टविरचितम्

# अर्जुनरावणीयम्

## ( रावणार्जुनीयम् )

### कैरलीटीकोपेत-संस्करणम्

सम्पादकः
विजयपालशास्त्री शिवचन्दसूनुः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

Samskrita Varsha Smriti Grantha Mala

Unpublished Manuscript Publication - 12

General Editor - Vempaty Kutumba Sastry

# ARJUNARĀVAṆĪYAM

## (RĀVAṆĀRJUNĪYAM)

'ĀṆINĪYA VYĀKARAṆODĀHARAṆA SAMĀPANĪYAṂ MAHĀKĀVYAM

OF

KĀŚMĪRIKA MAHĀKAVI BHŪMABHAṬṬA

With the *kairali* commentary

Edited by

VIJAYAPALA SHASTRY SHIVACHANDASUNU

Rashtriya Sanskrit Sansthan

New Delhi

*ओम्*

# विषय-सूचिः


| विषयः | पृष्ठाङ्कः |
|---|---|
| शुभसन्देशः | v |
| आमुखम् | vii-viii |
| भूमिका | xiii-xxxviii |
| **गाङ्कुटादिपादे (प्रथमाध्याय-द्वितीयपादे) प्रथमः सर्गः-** नायकस्य कृतवीर्यसूनोरर्जुनस्य गुणानां वर्णनम्। ततश्च तस्मिन् भूमिं शासति शरदागमन-प्रस्तावेन शरदृतु-वर्णनम्। | **1-24** |
| **भूवादिपादे (प्रथमाध्याय-तृतीयपादे) द्वितीयः सर्गः-** अर्जुनस्य शरदृतु-शोभावलोकनार्थं राजधानीतो नर्मदां प्रति प्रस्थानोप-क्रमः। राजमार्गे पुरसुन्दरीणामौत्सुक्येन राजदर्शनार्थमागमनम्। नारीणां मिथोऽर्जुनस्य गुणानां सङ्कथा। | **25-46** |
| **आकडारादिपादे (प्रथमाध्याय-चतुर्थपादे) तृतीयः सर्गः-** सेनया सह माहिष्मत्या निर्गतस्य राज्ञः कार्त्तवीर्यस्य वने मृगया-विहारः। | **47-60** |
| **समर्थपादे (द्वितीयाध्याय-प्रथमपादे) चतुर्थः सर्गः-** राज्ञोऽन्तःपुरनारीभिः सह नर्मदाजल-विहारः। | **61-76** |
| **पूर्वादिपादे (द्वितीयाध्याय-द्वितीयपादे) पञ्चमः सर्गः-** सूर्यास्तमयवर्णनं सन्ध्यावर्णनञ्च। | **77-84** |
| **अनभिहितपादे (द्वितीयाध्याय-तृतीयपादे) षष्ठः सर्गः-** चन्द्रोदयवर्णनं विप्रलम्भवर्णनं रात्रिक्रीडावर्णनञ्च। | **85-107** |
| **द्विगुपादे (द्वितीयाध्याय-चतुर्थपादे) सप्तमः सर्गः-** प्रतिनायकस्य रावणस्य राजसभायां भुवं भ्रान्त्वा प्रत्यावृत्तेन चार-मण्डलेन कार्त्तवीर्यैश्वर्यस्य वर्णितम्। तच्छ्रुत्वा क्रुद्धस्य रावणस्यार्जुनविजयाय तद्राजधानीं माहिष्मतीं प्रति प्रस्थानम्। | **108-123** |
| **प्रत्ययपादपूर्वार्धे (तृतीयाध्याय-प्रथमपादे) अष्टमः सर्गः-** विमानगतस्य रावणस्य माहिष्मत्याः सौन्दर्यस्य समृद्धेश्चावलोकनम्। तादृशीं नगरीं दृष्ट्वा ईर्ष्याकषायितचित्तस्य कुपितस्य दशाननस्य युद्धाह्वानायार्जुनं प्रति शुकस्य दूतरूपेण प्रेषणम्। कार्त्तवीर्यो नगरीं विहाय नर्मदाजलविहाराय गत इति शुकेनागत्य सूचितम्। | **124-141** |

# भूमिका

काश्मीरकाश्यपीवास्तव्यो वैयाकरणशिरोमणिर्महाकविर्भूमभट्टो रावणार्जुनीयेत्यपर-नामधेयम् अर्जुनरावणीयं नाम पाणिनीय-व्याकरणोदाहरण-समापनीयं[1] विलक्षणं महाकाव्यं विरचयाञ्चकार, यत्र काव्यकथायामष्टाध्यायी-सूत्रपाठक्रमेणोदाहरणानि गुम्फितानि। अनेन शैलीगतवैशिष्ट्येनापूर्वं प्रत्नमिदं काव्यरत्नं संस्कृत-वाङ्मय-शेवधौ सुगुप्तं सदस्मदीयभागधेयं व्यनक्ति नूनम्।

पुरा काश्मीरेषु बङ्गेषु केरलेषु चास्य भूयान् प्रचारोऽभूत्। कालक्रमेण तु दैवदुर्विलसिताद् महाकाव्यमिदं विलुप्तप्रायं बभूव। विगतख्रिस्तशतकात् कियत्पूर्वमर्जुनरावणीयस्य काश्मीरेष्वधिगता खल्वेका मूलपाठोपेता खण्डिता[2] शारदालिपिमयी मातृका। एतन्मूलां देवनागरी-प्रतिलिपिमुपजीव्य पण्डितशिवदत्त-काशीनाथाभ्यां सम्पादितम् अपूर्णमिदम् इदम्प्रथमतया निर्णयसागर-मुद्रणालयेन मुम्बापुरीगतेन मुद्राप्य 1900 तमे ख्रिस्ताब्दे प्राकाश्यत।

अहं कदाचिद् दृष्ट्वैवेदमद्भुतस्वरूपं काव्यं प्रथमदृष्ट्या कमपि लोकोत्तरं चमत्कारं हर्षप्रकर्षं चान्वभवम्। परमेतस्य पाठभ्रंशान् त्रुटितांशांश्चावलोक्य हृदये दृढं निखातेनारुन्तुदेन शोकशल्येन भृशमुद्विग्नोऽभवम्। अनिशमुद्वेजकमिदं शल्यमुद्धर्तुं प्रयस्यता ससम्भ्रममेतदन्वेषण-परायणेन मयास्य षोडश मातृका इवाह्लादजनन्यः सप्तदश मातृकाः समासादिता देश-विदेश-हस्तलेखागारेभ्यः। प्रारब्धं चेदं सम्पादनसत्रम्। सम्प्रतीदं करुणावरुणालयस्य भगवतो जगदीश्वरस्यानुग्रहेण गुरुजनानां निरतिशयप्रसादेन च सम्पन्नं भवतीत्यमन्दमानन्दं विन्दमानोऽस्मि।

**उदाहरणकाव्य-परम्परा–**

सरस-रीत्या व्याकरण-प्रक्रियां शिक्षयितुं व्याकृतानां पदानां प्रयोगाभ्यासं च कारयितुं प्राचीनकालत एव व्याकरणोदाहरण-समापनीयानां काव्यानां रचनायाः परम्परा विद्यते। महाभाष्ये प्रयोगप्रदर्शन-प्रसङ्गे उद्धृतैः कतिपयैः पद्यैरेतस्याः परम्परायाः सङ्केतो लभ्यते[3]।

---

1. उदाहरणसमापनं प्रयोजनमस्येति- उदाहरणसमापनीयम्, 'समापनात् सपूर्वपदात्' (5.1.112) इति छप्रत्ययः तदस्य प्रयोजनमित्येतस्मिन् विषये।
2. प्रतिलिपिपरम्परयानया मातृकया सम्बद्धायां पूना 2.- मातृकायां जोधपुर-मातृकायां च लिपिकरेणान्तेऽर्जुनरावणीयस्य खण्डितावस्था कीटभक्षितता जीर्णपत्रता चेत्थं वर्णिता-

    सच्छ्लाघ्यां रचनां विलोक्य मयका काव्येऽत्र भूमोदिते,
    यत्नोऽयं रचितो विलेखनकृते यत्तत्क्षमध्वं बुधाः!
    यन्मध्येऽत्र लिपिर्गता बहुरिति प्रागेव जीर्णानि यत्,
    पत्राण्यत्र च कीटदोष उदभूद् यत्तत्र किं कथ्यताम्॥

3. स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वभूते शातनीं पातनीं च।
    नेतारावागच्छतां धारणिं रावणिं च ततः पश्चात् स्रंस्यते ध्वंस्यते च॥ (महाभाष्यम्-1.1.56)
    बहूनामप्यचित्तानामेको भवति चित्तवान्। पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते॥
    मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम्। एतदप्यस्य कापेयं यदर्कमुपतिष्ठति॥
    (महाभाष्यम्-1.3.25)

**सद्वृत्तपूताः पवितान्ववायं यं द्रष्टुमायन्मुनयोऽपि मान्याः।**
**आकर्षमन्त्रैरिव सप्रयोगैराकृष्यते साधुगुणैर्न को वा ॥21॥**

मान्या मुनयोऽपि यं द्रष्टुमायन् आगमन्। मुनयोऽपीति विरोधं निराकरोत्यर्थान्तरन्यासेन। अत्र वैधर्म्येणार्थान्तरन्यासः। उपमालङ्कारोऽर्थान्तरन्यासस्योपस्कारकः। पूत-पवितशब्दयोश्च-कारात् सेटो निष्ठाप्रत्ययस्य कित्त्वाभावाद् गुणः। अन्यत्र कित्त्वाद् गुणाभावः ॥21॥

अस्य माहात्म्यात् सकलविद्वज्जनसेवित्वं यशोवृद्धिञ्चाह-

**ग्रन्थित्वा स्तुतिमुपगम्य यं ग्रथित्वा**
**मालां वा कुसुममयीं नुनाव लोकः।**
**गुम्फित्वा रिपुवनिताजनस्य वेणी-**
**र्यस्तस्थौ गुणकुसुमैर्दिशो गुफित्वा ॥22॥**

कविलोकः स्तुतिं श्लोकादीन् ग्रन्थित्वा यमुपगम्य नुनाव उपश्लोकितवान्। कुसुममयीं मालां ग्रथित्वेवेत्युपमालङ्कारेण सन्दर्भसौष्ठवपरिमलादि ध्वन्यते। यश्च रिपुवनिताजनस्य वेणीं गुम्फित्वा गुणकुसुमैर्दिशो गुफित्वा तस्थौ। गुणकुसुमैरिति रूपकेण दिशि दिशि पुष्पोपहारमिव गुणोपहारं कृत्वेति ध्वन्यते। वेणीग्रथनेनासां पतिविनाशस्सूचितः।

ग्रथित्वेत्यत्र 'ग्रन्थ सन्दर्भे' इत्यस्मात् क्त्वाप्रत्ययः। 'नोपधात्थफान्ताद्वा' क्त्वाप्रत्ययस्येण्न किद्वद् भवति। कित्त्वाभावे तु नलोपाभावः। ग्रथित्वेत्यत्र कित्त्वान्नलोपः। गुम्फित्वा गुफित्वेत्यत्र 'गुम्फ गुम्फने' इत्यस्माद् विकल्पेन कित्त्वाभावः ॥22॥

स्वयशोवर्धनं परयशोलोपञ्चाह-

**वञ्चित्वा नवकीर्तिरम्बुराशीनवचित्वेव गृहेऽपि यस्य तस्थौ।**
**लुञ्चित्वा भुवि यो यशांसि राज्ञामलुचित्वैव धनान्यभूत् कृतार्थः ॥23॥**

यस्य नवकीर्तिरम्बुराशीन् वञ्चित्वा तीर्त्वा अवचित्वेवागत्वेव गृहेऽपि तस्थौ। अनेन सर्वत्र व्याप्तेत्यर्थः। यो भुवि राज्ञां यशांसि लुञ्चित्वापनीय धनान्यलुचित्वैव अनपनीय कृतार्थोऽभूत्। धर्मविजयित्वात्। 'वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः'। 'वञ्चिलुञ्च्यृतश्चे'ति वञ्चेः क्त्वाप्रत्ययस्येड्वा किद्भवतीति किदभावे वञ्चित्वा, कित्त्वे वचित्वेति रूपम्। लुञ्चित्वेत्यत्र 'लुञ्च अपनयने' इत्यस्मात् लुञ्चित्वा अलुचित्वेति रूपे ॥ 23॥

अस्य बाहुबलमाह-

**अर्तित्वाजिं भुजद्वितीयः पर्यन्तं द्विषतां महानृतित्वा।**
**कीर्त्या सितया बभौ परीतश्चन्द्रश्चन्द्रिकयेव यस्समन्तात् ॥24॥**




**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi 110 058